केनोपनिषद

ॐ आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्र
अथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं
माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोत्, अनिरा
करणमस्त्वनिराकरणं मेऽस्तु। तदात्मनि निरते य
उपनिषत्सु धर्मास्ते मयि सन्तु, ते मयि सन्तु।
ॐ शान्तिः शान्तिः शान्तिः॥

ॐ केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः
प्रैति युक्तः। केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्र
क उ देवो युनक्ति॥१॥

श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य
प्राणः। चक्षुश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकाद्
अमृता भवन्ति॥२॥

३ न तत्र चक्षुर्गच्छति न वाग्गच्छति न मनो न
विद्मो न विजानीमो यथैतदनुशिष्यादन्यदेव तद्
विदितादथो अविदितादधि। इति शुश्रुम पूर्वेषां ये
नस्तद्व्याचचक्षिरे ॥३॥
४ यद्वाचानभ्युदितं येन वागभ्युद्यते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते
५ यन्मनसा न मनुते येनाहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते
६ यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते
यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते

७ यत् ~~श्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्~~।
~~तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥~~
८ यत् प्राणेन प्राणिति येन प्राणः प्रणीयते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥
॥ इति प्रथमः खण्डः ॥
१ यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं
यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम्
२ नाहं मन्ये सुवेदेति नो न वेदेति वेद च।
यो नस्तद्वेद तद्वेद नो न वेदेति वेद च॥२

यस्या मतं तस्य मतम् मतं यस्य न वेद सः।
अविज्ञातं विजानतां विज्ञातं अविजानताम्॥३॥
प्रतिबोधविदितं मतम् अमृतत्वं हि विन्दते।
आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्॥
इह चेद् अवेदीदथ सत्यमस्ति न चेदिहावेदीन्
महती विनष्टिः।
भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्मात्
लोकादमृता भवन्ति॥५॥

ॐ शान्ति! शान्ति!! शान्ति!!!

शिवचरणरजः- 'दुष्करनाथ'